# navaratnamAlikA

# નવરત્નમાલિકા

## Document Information

Text title : navaratnamaalikaa stotram.h

File name : devii_navaratna.itx

Category : devii, dashamahAvidyA, stotra, nava, devI, shankarAchArya

Location : doc_devii

Author : Shankaracharya

Transliterated by : Kapila Shankaran(achintya at ican.net) and Aravind

Proofread by : Sridhar - Seshagiri sridhar.seshagiri at gmail.com

Description-comments : There are variations

Latest update : September 3, 2002, March 24, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2020

*sanskritdocuments.org*

# નવરત્નમાલિકા

નામરત્નનવરત્નમાલિકા

હારનૂપુરકિરીટકુણ્ડલવિભૂષિતાવયવશોભિનીં
 કારણેશવરમૌલિકોટિપરિકલ્પ્યમાનપદપીઠિકામ્ ।
કાલકાલફણિપાશબાણધનુરઙ્કુશામરુણમેખલાં
 ફાલભૂતિલકલોચનાં મનસિ ભાવયામિ પરદેવતામ્ ॥ ૧॥ (૩)

ગન્ધસારઘનસારચારુનવનાગવલ્લિરસવાસિનીં
 સાન્ધ્યરાગમધુરાધરાભરણસુન્દરાનનશુચિસ્મિતામ્ ।
મન્ધરાયતવિલોચનામમલબાલચન્દ્રકૃતશેખરીં
 ઇન્દિરારમણસોદરીં મનસિ ભાવયામિ પરદેવતામ્ ॥ ૨॥ (૪)

સ્મેરચારુમુખમણ્ડલાં વિમલગણ્ડલમ્બિમણિમણ્ડલાં
 હારદામપરિશોભમાનકુચભારભીરુતનુમધ્યમામ્ ।
વીરગર્વહરનૂપુરાં વિવિધકારણેશવરપીઠિકાં
 મારવૈરિસહચારિણીં મનસિ ભાવયામિ પરદેવતામ્ ॥ ૩॥

ભૂરિભારધરકુણ્ડલીન્દ્રમણિબદ્ધભૂવલયપીઠિકાં
 વારિરાશિમણિમેખલાવલયવહ્નિમણ્ડલશરીરિણીમ્ ।
વારિસારવહકુણ્ડલાં ગગનશેખરીં ચ પરમાત્મિકાં
 ચારુચન્દ્રરવિલોચનાં મનસિ ભાવયામિ પરદેવતામ્ ॥ ૪॥ (૬)

કુણ્ડલત્રિવિધકોણમણ્ડલવિહારષડ્દલસમુલ્લસ-
 ત્પુણ્ડરીકમુખભેદિનીં ચ પ્રચણ્ડભાનુભાસમુજ્જ્વલામ્ ।
મણ્ડલેન્દુપરિવાહિતામૃતતરઙ્ગિણીમરુણરૂપિણીં
 મણ્ડલાન્તમણિદીપિકાં મનસિ ભાવયામિ પરદેવતામ્ ॥ ૫॥ (૫)

વારણાનનમયૂરવાહમુખદાહવારણપયોધરાં
 ચારણાદિસુરસુન્દરીચિકુરશેકરીકૃતપદામ્બુજામ્ ।

કારણાધિપતિપઞ્ચકપ્રકૃતિકારણપ્રથમમાતૃકાં
 વારણાન્તમુખપારણાં મનસિ ભાવયામિ પરદેવતામ્ ॥ ૬॥ (૭)

પદ્મકાન્તિપદપાણિપલ્લવપયોધરાનનસરોરુહાં
 પદ્મરાગમણિમેખલાવલયનીવિશોભિતનિતમ્બિનીમ્ ।
પદ્મસમ્ભવસદાશિવાન્તમયપઞ્ચરત્નપદપીઠિકાં
 પદ્મિનીં પ્રણવરૂપિણીં મનસિ ભાવયામિ પરદેવતામ્ ॥ ૭॥ (૯)

આગમપ્રણવપીઠિકામમલવર્ણમઙ્ગલશરીરિણીં
 આગમાવયવશોભિનીમખિલવેદસારકૃતશેખરીમ્ ।
મૂલમન્ત્રમુખમણ્ડલાં મુદિતનાદબિન્દુનવયૌવનાં
 માતૃકાં ત્રિપુરસુન્દરીં મનસિ ભાવયામિ પરદેવતામ્ ॥ ૮॥ (૮)

કાલિકાતિમિરકુન્તલાન્તઘનભૃઙ્ગમઙ્ગલવિરાજિનીં
 ચૂલિકાશિખરમાલિકાવલયમલ્લિકાસુરભિસૌરભામ્ ।
વાલિકામધુરગણ્ડમણ્ડલમનોહરાનનસરોરુહાં var વાલિકાચતુર
 બાલિકામખિલનાયિકાં મનસિ ભાવયામિ પરદેવતામ્ ॥ ૯॥ (૧)

નિત્યમેવ નિયમેન જલ્પતાં
 ભુક્તિમુક્તિફલદામભીષ્ટદામ્ ।
શંકરેણ રચિતાં સદા જપે-
 ન્નામરત્નનવરત્નમાલિકામ્ ॥ ૧૦॥ (૧૧)

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છંકરભગવતઃ કૃતૌ નવરત્નમાલિકા સંપૂર્ણા ॥

Another variation follows with difference in sequence
marked () above and some additional verses added
1, 2, and 10 below (3 above not present) as in scan.

નામરત્નનવરત્નમાલિકા

ધ્યાનશ્લોકઃ ।
કાલિકાતિમિરકુન્તલાન્તઘનભૃઙ્ગમઙ્ગલવિરાજિનીં
 ચૂલિકાશિખરમાલિકાવલયમલ્લિકાસુરભિસૌરભામ્ ।
વાલિકામધુરગણ્ડમણ્ડલમનોહરાનનસરોરુહાં var વાલિકાચતુર

બાલિકામખિલનાયિકાં મનસિ ભાવયામિ પરદેવતામ્ ॥

દાડિમીકુસુમમઞ્જરીનિકરસુન્દરે મદનમન્દિરે
યામિનીરમણખણ્ડમણ્ડિતશિખણ્ડિકે તરલકુણ્ડલે ।
પાશમઙ્કુશમુદશ્ચિતં દધતિ કોમલે કમલલોચને
તાવકે વપુષિ સન્તત જનનિ! મામકં ભવતુ માનસમ્ ॥ ૧ ॥

કુન્દસુન્દરમન્દહાસવિરાજિતાધરપલ્લવા-
મિન્દુબિમ્બનિભાનનામરવિન્દચારુવિલોચનામ્ ।
ચન્દનાગરુપઙ્કરૂષિતતુઙ્ગપીનપયોધરા
ચન્દ્રશેખરવલ્લભાં પ્રણમામિ શૈલસુતામુમામ્ ॥ ૨ ॥

હારનૂપુરકિરીટકુણ્ડલવિભૂષિતાવયવશોભિનીં
કારણેશવરમૌલિકોટિપરિકલ્પ્યમાનપદપીઠિકામ્ ।
કાલકાલફણિપાશબાણધનુરઙ્કુશામરુણમેખલાં
ફાલભૂતિલકલોચનાં મનસિ ભાવયામિ પરદેવતામ્ ॥ ૩ ॥

ગન્ધસારઘનસારચારુનવનાગવલ્લિરસવાસિનીં
સાન્ધ્યરાગમધુરાધરાભરણસુન્દરાનનશુચિસ્મિતામ્ ।
મન્ધરાયતવિલોચનામમલબાલચન્દ્રકૃતશેખરીં
ઇન્દિરારમણસોદરીં મનસિ ભાવયામિ પરદેવતામ્ ॥ ૪ ॥

કુણ્ડલત્રિવિધકોણમણ્ડલવિહારષડ્દલસમુલ્લસ-
ત્પુણ્ડરીકમુખભેદિનીં ચ પ્રચણ્ડભાનુભાસમુજ્જ્વલામ્ ।
મણ્ડલેન્દુપરિવાહિતામૃતતરઙ્ગિણીમરુણરૂપિણીં
મણ્ડલાન્તમણિદીપિકાં મનસિ ભાવયામિ પરદેવતામ્ ॥ ૫ ॥

ભૂરિભારધરકુણ્ડલીન્દ્રમણિબદ્ધભૂવલયપીઠિકાં
વારિરાશિમણિમેખલાવલયવહ્નિમણ્ડલશરીરિણીમ્ ।
વારિસારવહકુણ્ડલાં ગગનશેખરીં ચ પરમાત્મિકાં
ચારુચન્દ્રરવિલોચનાં મનસિ ભાવયામિ પરદેવતામ્ ॥ ૬ ॥

વારણાનનમયૂરવાહમુખદાહવારણપયોધરાં
ચારણાદિસુરસુન્દરીચિકુરશેકરીકૃતપદામ્બુજામ્ ।
કારણાધિપતિપઞ્ચકપ્રકૃતિકારણપ્રથમમાતૃકાં
વારણાન્તમુખપારણાં મનસિ ભાવયામિ પરદેવતામ્ ॥ ૭ ॥

આગમપ્રણવપીઠિકામમલવર્ણમઙ્ગલશરીરિણીં
    આગમાવયવશોભિનીમખિલવેદસારકૃતશેખરીમ્ ।
મૂલમન્ત્રમુખમણ્ડલાં મુદિતનાદબિન્દુનવયૌવનાં
    માતૃકાં ત્રિપુરસુન્દરીં મનસિ ભાવયામિ પરદેવતામ્ ॥ ૮॥

પદ્મકાન્તિપદપાણિપલ્લવપયોધરાનનસરોરુહાં
    પદ્મરાગમણિમેખલાવલયનીવિશોભિતનિતમ્બિનીમ્ ।
પદ્મસમ્ભવસદાશિવાન્તમયપઞ્ચરત્નપદપીઠિકાં
    પદ્મિનીં પ્રણવરૂપિણીં મનસિ ભાવયામિ પરદેવતામ્ ॥ ૯॥

માણિક્યકુણ્ડલિતમૌક્તિકવાલિકેન
    મન્દસ્મિતેન વદનારુણપઙ્કજેન ।
કાલાન્તદીર્ઘમણિમઙ્ગલસૂત્રકણ્ઠી
    માતા વિશાલનયના મમ સન્નિધત્તામ્ ॥ ૧૦॥

નિત્યમેવ નિયમેન જલ્પતાં
    ભુક્તિમુક્તિફલદામભીષ્ટદામ્ ।
શંકરેણ રચિતાં સદા જપે-
    ન્નામરત્નનવરત્નમાલિકામ્ ॥ ૧૧॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છંકરભગવતઃ કૃતૌ નવરત્નમાલિકા સંપૂર્ણા ॥

Encoded by Kapila Shankaran and Aravind.
Proofread by Sridhar Seshagiri sridhar.seshagiri@gmail.com

*navaratnamAlikA*

pdf was typeset on March 24, 2020

Please send corrections to *sanskrit@cheerful.com*